नामांक Roll No.

Sl.No. :

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – 30

No. of Printed Pages – 07

**VU–94–Sans. Vangmay**

# वरिष्ठ उपाध्याय परीक्षा, 2019

## संस्कृत वाङ्मय (अनिवार्यः)

**समय** : 3¼ **घण्टे**

**पूर्णांक** : 80

यहाँ से काटिए

प्रश्न पत्र को खोलने के लिए यहाँ फाड़ें

यहाँ से काटिए

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्काः अनिवार्यतः लेख्याः।

2) सर्वे प्रश्नाः अनिवार्याः।

3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि।

4) एकस्य प्रश्नस्य सर्वे भागाः एकत्र एव लेखनीयाः।

5) सर्वे प्रश्नाः संस्कृतमाध्यमेन उत्तरणीयाः।

1) ''वासुदेवः'' इत्यत्र कः प्रत्ययः? [1]

2) ''भिक्षादिभ्याऽण्'' इति सूत्रस्य उदाहरणं लिखत। [1]

3) वीरस्य भार्यायाः द्वे नामनी लिखत। [1]

4) अमरकोषस्य लेखकः कः? [1]

5) सख्युः नामद्वयं लिखत। [1]

6) पितुः पिता कः? लिखत। [1]

7) दिने कति प्रहराः भवन्ति? [1]

8) सिंहस्याधिपति कः ग्रहः? [1]

9) 'सुरेशः' इति नाम्नः कः राशिः भवति? [1]

10) 'चन्द्रः' इति ग्रहस्य पर्यायद्वयं लिखत। [1]

11) शिवराजस्य रचनाकारस्य विषये संक्षेपेण लिखत। [2]

12) अधोलिखितस्य भावार्थो लेख्य :- [2]

रात्रीर्गभिष्यति भविष्यति सुप्रभातं

भास्वनुदेष्यति हसिष्यति पङ्कजश्रीः।

13) भर्तृहरेः परिचयात्मकवाक्यद्वयं लिखत। [2]

14) अधोलिखितस्य पद्यांशस्य भावार्थो लेख्य :- [2]

रे रे चातक! सावधानमनसा मित्र! क्षणं श्रूयता

मन्भोदा बहवो वसन्ति गगने सर्वेऽपि नैतादृशाः।

15) चन्दनस्य चत्वारि नामानि लेखनीयानि। [2]

16) करणानि कति भवन्ति? नामानि लेखनीयानि। [2]

17) रेखाङ्कित-पदयोः अशुद्धिसंशोधनं कुरूत - [2]

i) ग्रामस्य परितः वनम् अस्ति।

ii) विप्रेण गां ददाति।

18) कस्यचिदेकस्य गद्यांशस्य सप्रसङ्ग – व्याख्या विधेया – [1 + 2 = 3]

i) सन्यासी – (स्वगतम्) राजनीति – निष्णातः शिववीरः। सर्वथा दौवारिकता – योग्य एवायं द्वारपालः स्थापितोऽस्ति। परीक्षितमप्येनमकस्मिन् विषये पुनः परीक्षिष्ये तावत्। (प्रकटम्) दौवारिक! इत आयाहि, किमपि कर्णे कथयिष्यामि।

ii) ततस्तानपूरिकायाः स्वरान् संमेल्य पातित – वामजानुः तानपूरिकातुम्बं क्रोडे निधाय दक्षपादस्योत्थितजानुनि च दक्ष – हस्त – कर्पूर – स्थापन – पुरःसरं तेनैव हस्तेन तर्जन्यङ्गल्या तानपूरिकां रणयन् स्वकण्ठे नापि त्रीन् ग्रामान् सप्तस्वरांश्च समधात्।

19) शिववीरस्य विषये पञ्चवाक्यानि लेख्यानि। [3]

20) कस्यचिदेकस्य पद्यांशस्य सप्रसङ्ग व्याख्या विधेया – [1 + 2 = 3]

i) अकरूणत्वमकारणविग्रहः

परधने परयोषिति च स्पृहा।

सुजनबन्धुजनेष्वसहिष्णुता

प्रकृति सिद्धमिदं दुरात्मनाम्।।

ii) मृग–मीन–सज्जनानां तृण–जल–सन्तोष–विहितवृत्तीनाम्।

लुब्धक–धीवर–पिशुना निष्कारण वैरिणो जगति।।

21) मनुष्याणां शरीरस्थः महान् रिपुः कः? [3]

22) केषांचित् त्रयाणां वाक्यानां संस्कृतभाषायाम् अनुवादो विधेयः [3 × 1 = 3]

i) हम दोनों पाठशाला जायेंगे।

ii) जननी और जन्मभूमि स्वर्ग से भी बढ़कर है।

iii) देवदत्त गेंद से खेलता है।

iv) स्वच्छता हमारा मौलिक दायित्व है।

v) पेड़ से पत्ते गिरते हैं।

23) कयोश्चिद् द्वयोः सूत्रयोः व्याख्या कार्या – [2 × 2 = 4]

i) शिवादिभ्योऽण्

ii) इसुसुक्तान्तात् कः

iii) पर्यभिभ्यां च

24) कयोश्चिद् द्वयोः सूत्रयोः व्याख्या कार्या – [2 × 2 = 4]

i) परोक्षे लिट्

ii) सार्वधातुकार्धधातुकयोः

iii) मेर्निः

25) कयोश्चिद् द्वयोः चत्वारः – चत्वारः पर्यायाः लेखनीयाः – [2 × 2 = 4]

i) माता

ii) दन्तः

iii) वस्त्रम्

26) कयोश्चिद् द्वयोः नामानि लेखनीयानिः – [2 × 2 = 4]

i) अयनम्

ii) योगः

iii) तिथयः

27) कमपि–एकं विषयमवलम्ब्य निबन्ध (150 शब्दैः) लिखत – [5]

i) अस्माकं विद्यालयः

ii) संस्कृत–संभाषणस्य महत्त्वम्

iii) वृक्षारोपणम्

iv) महाकवि कालिदासः

28) अधोलिखितेषु केऽपि त्रयः प्रयोगाः साधनीयाः – [3 × 2 = 6]

गव्यम्, रैवतिकः, वाशिष्ठः, काषायम्, सामाजिकः

29) अधोलिखितेषु केऽपि त्रयः प्रयोगाः साधनीयाः – [3 × 2 = 6]

भवतु, भवितासि, भवतः, भविष्यति, अभवाम

30) निम्नांकितेषु केऽपि चत्वारः प्रयोगाः साधनीयाः – [4 × 2 = 8]

ग्रामता, वैयाकरणः, सममयम्, काषायम्, उभयम्, शुक्रियम्

♦ ♦ ♦

DO NOT WRITE ANYTHING HERE